Research Paper Sanskrit

संस्कृतकाश्मीरीय़कवय़: तेषां परिचय़ा: काश्मीरस्य संस्कृतिश्च (अष्टमेशावीय़त: आरभ्य द्बादशेशावीय़पर्यन्तम्)

Madhumita Jana

अतिथि अध्यापकः संस्कृत विभागः विवेकानन्दमिशनमहाविद्यालयः चैतन्यपुरः (हलदिया) पूर्वमेदिनीपूरः पश्चिमवङ्गः

ABSTRACT

संस्कृतसाहित्यामृतनिष्यन्दं पेपीय़मानेषु कविषु केचन स्वकीय़ाम् अपूर्ववस्तुनिर्माणक्षमां प्रज्ञाम् अनुरज्य आत्ममहिमानं द्यौतित्वा न्यमज्जन् केचन वा आत्मप्रतिभाम् अप्रकाश्य रह: अतिष्ठन् । केचन केवलं काव्यानि, केचन नाटकानि, केचन वा खण्डकाव्यानि विलिख्य संस्कृतसाहित्यारामे प्रसूनपदमाल्यं कुर्वन्ति । केषाञ्चन परिचय़: अस्माकं नय़नपथं पान्हाय़ते, केषाञ्चन परिचय़: वा न विज्ञायते । वस्तुत: संस्कृतकवय़ें खलु आत्मपरिचय़विमुखा:, आत्मप्रशंसा विमुखा: च । आत्मप्रशंसोदगीरणे अहमिका संजाय़ते इति देववागविषय़ाणां कवीनां मति: । तथा हि तेषां परिचय़ानु सन्धाने प्राप्तक्लमा वय़ं प्रतिहता: । अष्टमेशावीयत: प्रभृति द्बादशेशावीय़पर्यन्तं अनेके प्राप्तयशस: कवय़: अस्मिन् भारते गौरवस्थानम् अलभन्त । अत्र अनेकेषां खलु कवीनां परिचय़: प्रदीय़ते । तेषु उल्लेखार्हा यथा - रत्नाकरः, अमरुकः, विलहनः, कलहनः । एतेषां प्राय़: सर्वे काश्मीरस्य एव । वस्तुत: ये खलु कवय़: उपराजम् अतिष्ठन्, राजसभाय़ा: पदम् अलं कृतवन्त:, तेषां सार्विक : परिचय़: लोलुक्यते । अपरेषां तु प्राय़: न प्रचाराभावात् । सुरवाक् प्रिय़ाना कवीनां जन्मस्थानस्य संस्कृति: कीदृशी आसीत्, प्रकृत्या कस्मिन् स्थाने ते अजाय़न्त इति यथार्थरुपेन निरुपनं प्राय़: असम्भवम् एव । तथापि ततप्रदर्श्यते ।

KEYWORDS संस्कृतकवि, साहित्य, काव्य, नाटक, खण्डकाव्य ।

प्राचीने भारते सरस्वतीसमुपासका: कवय़: जात्या क्षत्रिय़ा: ब्राह्मणा: वा भवन्ति । किन्तु वैश्यशूद्रकवी न दरीदृश्यते । वस्तुत: शूद्राणाम् आगमाभ्यासे नाधिकारो वर्तते । तथा हि शूद्रकविचिन्तमकल्पनीय़म् । किन्तु वैश्यकवि: न दृश्यते । वस्तुत: प्राचीने युगे ब्राह्मणा: तां संस्कृतविद्या सवेषु न प्रचारय़ामासु: । केवलं स्वेषाम् आवद्धीकृतवन्त: तथा हि वैश्येषु संस्कृताभ्यास: प्राय़: न लक्ष्यते । यत: ब्राह्मणा: क्षत्रिय़ा: केवलं संस्कृतचर्चाम् अधिकतय़ा कृतवन्त: तथा हि तेषु एव कवय़: लोक्यन्ते । ब्राह्मणा: कवय़: राज्ञ: प्रशंसापुरसरं काव्यानि ससृज: । एतेन ते कवय़: राज्ञ: प्रिय़भाज: वभूवु: । तथा हि तेषां कृतित्वं सर्वान् ततार ।

अत्र उपस्थितस्य विषय़स्य किञ्चित् नृत्वत्वं वर्तते । कवय़: जन्मस्थानम्, तस्य स्थानस्य संस्कृति:, तस्मिन् स्थाने लोकानां वृत्ति:, तेषां जीवनं कीदृशमासीत्, एते विषय़ा: अस्माकम् अविज्ञाता । अस्मिन् एब निवन्धे ते विषया सम्यकतय़ा आलोचिता: । कवीनां काव्यानां नाटकानां वा वस्तूनि प्राय़: पुराणमहाकाव्याश्रय़ाणि । तत्र कवय़: पात्र-रसादे: संयोगे: नूतनत्वं प्रत्युत्-पादय़ामासु: । पुराणमहाकाव्याश्रय़ाणि राचितानि यानि काव्यानि तस्मात् काश्मीरस्य संस्कृति: किञ्चित् उपलभ्यते । तर्हि काव्येषु नाटकेषु खन्डकाव्येषु यानि यानि तथ्यानि उपलभ्यन्ते, तानि आधारीकृत्य निवन्धस्य समृद्धि: क्रिय़ते । किन्तु ऐतिहासिककाव्येषु यद्यपि अनेकानि तथ्यानि परिप्राप्यन्ते । तथापि ऐतिहासिककाव्यानां नूनतावशात् तस्मादपि अधिकानि तथ्यानि न प्राप्यन्ते । कलहनस्य राजतरङ्गिन्या: केवलं काश्मीरस्य संस्कृति:, तस्य स्थानस्य राजवंशस्य परिचय़:, विभिन्नानां स्थानानां नामानि च प्राप्यन्ते । काश्मीरस्य संस्कृति: राजतरङ्गिन्यां प्राप्यते ।

प्रतिकालम् अनेके भूपाला: अस्मिन् भारते राजत्वं कृतवन्त:, अनेका भिन्ना: जातय़: भारतं शशसु: । विभिन्नस्य स्थानस्य नामानि अपि ते परिवर्तन्यं चक्रु: । तथा हि प्रकृतं सत्यम् अस्माकम् अविज्ञातम् । पुनश्च नृपानां राज्यविस्तारेण सह तस्य स्थानस्य परिवर्तनमपि संजाय़ते । अत: सत्यानुसन्धानं दुष्करम् । पुनश्च एकस्य स्थानस्य एकाधिकानि नामानि विभिन्ने राज्ये प्राप्यन्ते । अत: कवीनां जन्मस्थानविषये विविधानि तथ्यानि प्रचलिता: तथापि कलहनस्य राजतरङ्गिन्यां काश्मीरस्य संस्कृतिर्विज्ञाय़ते ।

रत्नाकर (७००) - रत्नाकरस्य समय़: पश्चाशत् सर्गनिवद्धं वृहत्कावं खलु 'हरविजय़म्' नाम महाकाव्यं ८५० मितख्रीष्टसंवत्सरस्य समीपवर्तिनि काले किल रत्नाकर: चकार । रत्नाकरस्य देश: हरविजय़प्रणेता, महाकवि रत्नाकर: काश्मीरानलङ्कृतवान् । अस्य पितुनाम अमृतभानुरित्यासीत् । रत्नाकरस्य आश्रय़भूतो राजा चिप्पटजय़ादित्य आसीत्। रत्नाकरोक्त्या स राजा वालवृहस्पत्युपाधिक आसीत्, यतोऽसौ 'वालवृहस्पत्यनुजीविन:' इति स्वविषय़े लिखति । अवन्तिवर्मा च ८५५ त: ८८४ पर्यन्तं राज्यं कृतवान् । अतो रत्नाकरस्य समय़: नवमशतकवर्तित्वं सुप्रतीतम् ।

रत्नाकरस्य रचना - रत्नाकरस्य हरविजय़काव्यं संस्कृतकाव्येषु परिमाण्तो गुणश्च श्रेष्ठं मन्यते । अत्र पञ्चाशत् सर्गाः सन्ति ४३२१ संख्यकानि च पद्यानि विद्यन्ते । रत्नाकरस्य समय़े माघस्य महती ख्यातिरासीत्, माघस्य प्रसिद्धिमालोक्य त प्रतिस्पर्धय़ेव रत्नाकरेण हरविजय़ं प्रणीतम् ।
रत्नाकरस्य काव्यशैली - कलहणेनास्य काव्यस्योल्लेख: कृत: अलकेनात्र व्याख्या लिखिता क्षेमेन्द्रेनात्र प्रयुक्ताया वसन्ततिलकाया: प्रशंसा कृता । कविना शास्त्रीयपण्डितस्य पराकाष्ठा प्रदर्शिता ।

अमरुकः ८०० अमरुकस्य समय़ - ८५० ख्रीष्टाव्दीय़े समय़े आनन्दवर्धनाचार्य: अमरुकविं प्रथितयशस्यं मन्यते । वामनाचार्य: अपि तस्य नामोल्लेखं न कृत्वा तस्य श्लोकत्रय़म् उद्धृतवान् । वामनाचार्य: खलु ८०० शतकस्य, अत: स: अमरकवि: ८०० ख्रीष्टाव्दीय़ समय़स्य पूर्वं आसीत् । कीथय़ाहादास्य मतानुसारं स ६५० ख्रीष्टाव्दत: आरभ्य ७५० ख्रीष्टाव्द सममध्ये वर्तमान आसीत् ।

अमरुकस्य जन्मस्थानम् - लौकिककथानुसारं स काश्मीरस्य अधिवासी एव । तत्सम्पर्के न किमपि ज्ञाय़ते ।

अमरुकस्य रचना - अमरुकस्य काव्यं अमरुशतकम् इति ख्यातम् । अस्य काव्ये शाखाचतुष्टयसंस्करणान्युपलभ्यन्ते । अत्र पञ्चदशोत्तरशतं च श्लोका दृश्यन्ते ।भिन्नभिन्नसंस्करणेषु श्लोकानामानुपूर्वीभेदोऽपि अवलोक्यते । यानि यानि पद्यानि अमरुकस्य नाम्ना संगृहितानि न तानि अमरुशतकस्य कस्मिंश्चिदपि संस्करणे विद्यन्ते । अमरुकस्य कवेः मुक्ताः शृङ्गाररसस्यन्दिनः प्रवन्धायमणा प्रसिद्धा एव । अत्र वृत्तं च शार्दूलविक्रिडितम् । भाषा समासविरहिता स्वल्पसमासा वा । अपि तु अलंकारस्य प्रयोगनैपुन्यं दृश्यते । अस्य प्रति श्लोकं शृङ्गारभागिरथी प्रवहति ।
अमरुकस्य काव्यशैली - अमरुकस्य शैली तावत् वैदर्भी । अस्य भाषा सरला भास्वरा । श्लोकेषु चारुता पाठकचित्तं चकास्ति । सर्वोपरि श्रुङ्गाररसानुकुलाः व्यञ्जनाशक्तिरतिपौढा सन्ति ।

विल्हन: (११००) - विलहनस्य समय़: - विलहण:स्वकृते विक्रमाङ्कदेवचरिते महाकाव्ये अन्तिम अष्टादशसर्गे स्वीय़ं चरितं विस्तरेणोपनिवद्धवान्, ततोऽवगम्यते यद् अस्य समय़: एकादशाख्रिष्टाव्दस्योत्तरार्ध: इति श्री पण्डित वलदेवोपाध्याय़ा: ।

विक्रमादित्ययष्टस्य कालः १०७६ तः ११२७ इ पर्यन्तं मन्यतेऽतोऽस्य कवेः समयः एकादशशतकोत्तरभागे द्बादशशतकस्यादिभागश्च निश्चीयते इति आचार्य श्रीरामचन्द्रमिश्रमहोदयाः ।

विलहनस्य देशः - अस्य कवेः प्रपितामहः मुक्तिकलशः आसीत् । सः राजकमलस्य पौत्रः जेष्ठकलशस्य पुत्रः मध्यमो विलहनः । माता च अस्य नागदेवी । अस्य भ्रातरौ इष्टरायः आनन्दश्चेति द्बौ आस्ताम् । अयं काश्मीरे एव शिक्षितः । केसरस्य कवितायाश्चोत्पत्तिस्थानं काश्मीरदेश एवेति विल्हणः । आश्रयदातारं कमपि गुणिनं राजानमन्विष्यन्नयं मथुरा-न्यकुब्ज-प्रयाग-काशी धारादीनि स्थानानि गत्वा दक्षिणभारतस्थितं कल्याणनगरं प्राप्तवान् । यत्र तदा चालुक्यवंश्यः प्रसिद्धो राजा विक्रमादित्यः षष्ठः शासनं करोति स्म । भोजो धारानरेशो नानेन दृष्टो यदाऽयं धारागमनात् पुर्वमेव स दिवंगतवानासीत् ।
विल्हनस्य जीवनवृत्तम् - नाटिकायां शृङ्गारस्य पञ्चाशिकायां वियोगस्य प्राधान्यं निखिले भारते भ्रमन् कविः वृन्दावनं, मथुरा, काशीं, सोमनाथादिकं चाजगाम । समयतस्तत् स्थानानि वर्णयति -
यत्र स्त्रीणां मसृण्घुसृणलेपनोष्णा कुचश्री -
स्ताः कस्तूरीपरिमलमुचः पटिट्का राङ्कवाणाम् ।
नौपृष्ठस्थाः शिशिरसमये ते वितस्ताजलान्तः
स्नानावासाः प्रचुरमपि च स्वर्गसौख्यं दिशन्ति ॥

विल्हनस्य रचना- अस्य रचनात्रयमक्षिपथमायाति- विक्रमाङ्कदेवचरितम्, कर्णसुन्दरीनाटिका, चौरपञ्चाशिका च । विल्हनकृते विक्रमाङ्कदेवचरिते अष्टादश सर्गाः सन्ति । अत्र चालुक्यवंशस्य विक्रमादित्यषष्ठस्य जीवनचरितं प्रसङ्गतस्त्पूर्वजानां च चरितं निवद्धं विद्यते । ऐतिहासिकघटनानानं निर्देशे विल्हणस्तथा सावधानोऽवर्त्तत यथा चालुक्यवंशस्येतिहासोऽत्र स्फुटावभासतां । अत्र काव्ये कविना वैदर्भमार्गस्यानुसरणं कुर्वता माधुर्यस्य प्रसाद्स्य च प्रयोगे प्रचुरं प्रयतितम् । वीररसस्य प्राधान्येऽपि शृङ्गारादिरसस्तदङ्गतया निपुणं निबधः । आहवमल्लस्य पुत्रत्रये मध्यम एव काव्यनायकः चोलवंशजा चन्दनदेवी च नायिका ।

विल्हनस्य काव्यशैली - कालिदासेन यथा रघुवंशो इन्दुमतीस्वयंवरवर्णनं कृतं तथैव विल्हणेनापि स्वयंवरस्य वर्णनं कृतम् । समतानां दर्शनेन सुखमवगन्तुं शक्यते, यद् विल्हणेन कालिदासकाव्यानि निपुणमनुशील्यौव स्वीयं काव्यं निर्मितम् । वसन्त-पुष्पावचय-सहस्नान-मधुपान-वर्षा-मृगयादीनां सुन्दरं चित्रं विल्हणस्य काव्ये वर्तते ।भाषायाः प्राञ्जलता, सरलता स्पष्टता चात्रावलोकनीया । वैदर्भी अत्र विराजते ।

कल्हन्णः- कल्हणस्य समयः संस्कृते इतिहासलेखकेषु प्रमुखः खलु कल्हण एव । कल्हणः स्वीयां राजतरङ्गिणीं राज्ञः सुस्सलस्य पुत्रे राजनि जयसिंहे (११२७-११५९) शासति निर्मितवान् । कल्हणेन ११४८ तमेशवीयवर्षे प्रारब्धा राजतरङ्गिणी ११५० तमेसवीयवर्षे समापितेति वर्षत्रयं तत्र कार्ये लग्नम् ।

कल्हणस्य देशः - कल्हणोऽयं काश्मीरदेशवास्तव्यः आढ्य ब्राह्मणवंशीयः राजसभास्थः । अस्य पिता चणपकः काश्मीरनृपतेः हर्षदेवस्य प्रधानामात्यः आसीत् । पितुस्थानं प्राप्तुं सक्षमोऽप्ययं राजसेवनं परित्यज्य लेखनं प्रारभत । कल्हणः परमशैवः सन्नपि धार्मिकदृष्टौ सहनशीलो बौद्धानामहिंसासिद्धानते धृतादरस्तन्त्रमार्गवि मुखश्चासीत् ।

कल्हणस्य जीवनवृत्तम् - कल्हणो रामायणमहाभारतयोरन्यसम्स्कृत काव्यानाञ्च निपुणं ज्ञाता ज्यौतिषशास्त्रनिषात श्चासीत् । हर्षे हते सति स काश्मीरान् बिहाय वाराणसीं अध्यवसत् । कल्हण्स्य सम्स्कृतं नाम कल्याण इत्यासीत् । स हि अलकदत्तनाम्नः कस्यचित्सत्पुरुषस्य च्छत्रच्छायामाश्रितवान् ।

कल्हण्स्य रचना- राजतरङ्गिणी कश्मीरदेशस्य राजनौतिकं भौगलिकं सामाजिकं साहित्यिकमैतिहासिकं च विवरणमत्र दत्तम् । अष्टौ तरङ्गाश्चात्र सन्ति । ८१३ख्रिष्टाब्दात् ११५० ख्रिष्टाब्दं यावद् वैज्ञानिकमितिहासोऽत्र मिलति । अस्मात् प्राग् यत् कथितं तत् कल्पना प्रसूतमेव ।

एतादृशा अप्यैतिहासिका दृश्यन्ते श्रुयन्ते च ये स्बदेशस्य प्रतिष्ठां वर्धयितुं न सङ्कुचन्ति परन्तु कल्हणः तादृशो नासीत्, स हि नितान्तनिष्पक्षपातया वुद्धा इतिहासं लिलेख, अतः स लिखतिस्म-
"श्लाघ्यः स एव गुणवान् रागद्बेष वहिष्कृता ।
भूतार्थकथने यस्य स्थेय्रस्येव सरस्बती ॥"

इमामेव धारणां प्रमापयितुं कल्हणः काश्मीरभावानां भिरुताम्, मिथ्याभाषणप्रवृत्तिम्, सङ्ग्रामतः पलयेनोन्मुखताम्, पक्षपातिताम्, क्षुद्रताम् मानसिकीं दुर्बलताञ्च स्पष्टंनिर्दिष्टवान् । अनयैव वस्तुवृत्तान्तानुसारितया कल्हणः स्वं ग्रन्थं भुतकालस्यादर्शं विधातुं साफल्यमलभत ।

कल्हणस्य कव्यशैली - कल्हणस्य विरचितं राजतरङ्गिणीं खलुकृष्टकाव्यवर्गप्रवेशं न अर्हतीति तावत् सङ्केतितचरम् ।परवर्तीकालेतिहासग्रन्थेषु गद्यपद्यायते इत्येव वक्तुमुचितम् । अस्याः भाषा सरला सरसा सुप्रबोधा ।यथा हर्षस्य निर्जनवासस्य विपत्तिनां च वर्नने तथा ललितस्वभावोक्त्या कविस्तत्र आत्मनः सत्यां कविप्रतिभां व्यनोक्ति । ग्रन्थेऽत्र दृश्यकाव्यानन्दशर्व्यते । पदे पदे उपमा प्रयोगोऽस्य महाभिनिवेशो दृश्यते । श्लेषविरोधाभासादीनां वहुलः प्रयोगः यत्र तत्र विराजन्ते । छन्दसां प्रयोगनैपुन्येन पाठकानां मनःसु औदासिन्यं उत्पादयति । अतः इतिहासविवरणभुतेऽप्यस्मिन् ग्रन्थे कव्यशोभा दर्शनीया ।

काश्मीरस्य संस्कृतिः - भारतवर्षस्य उत्तरवर्ती सीमन्ते काश्मीरस्य अवस्थानम् । काश्मीरस्य प्राकृतिकसुषोमा तथा स्वास्थ्यप्रद जलबायु बिख्यात आसित् । सामाजिक दृष्ट्याम् अस्य स्थितिः महत्यपूर्ण । उत्तर-पश्चिम भारतस्य मार्गरक्षक इति काश्मीरस्य प्रसिद्धिं आसित् । अस्य इतिहास कल्हण्स्य राजतरङ्गिण्यां किञ्चित् ज्ञायते । तस्य देशोपदेशग्रन्हात् ज्ञायते यत् तस्मिन् समये शठगनिका कृपणासद्ब्यक्तीनां प्रभावः समग्रे काश्मीरे आसित् । मानवाः विभिन्नां जीविकां परिगृहनन्ति, कोऽपि चर्मकार, कोऽपि चिकित्सकः कोऽपि कृषकः वा । तस्मिन् समये धणीन कड्कणहाराड्गदालंकारान् दधन्ति । किन्तु दरिद्रा अर्थाभावात् न परिदधन्ति । मानवाः नालिकेरसुरां पिवन्ति । अपि च नार्य्यः अपि सुरां पिवन्ति । नागरिकाः कृथपट्टवस्त्रादीन् व्यवहरन्ति । निषादाः नौचालनायां सिद्धहस्ताः आसन् । तस्मिन् एव समये काश्मीरे जातिभेदप्रथा अधिकतया लालक्ष्यते । अपि च कृषकाः कर्षणं कृतवन्तः, जलसेचनप्रक्रियापि तस्मिन समये आसीत । कृषकाः धान्यं वपन्ते स्वयं वरप्रथा, असवर्ने विवाहप्रथा च प्राचीने काश्मीरे प्रचलिते आस्ताम् । नर्त्तक्याः कथा राजतरङ्गिण्यां प्राप्यते । अतः अनुमीयते यत्, नार्य्य एव नृत्यकर्मणि पारदर्शितां प्रदर्शयन्ति स्म । विप्राः केवलमात्रं पूजाकर्मनि सम्वन्धाः आसन् । प्राचीने काश्मीरे भूपालाः विष्णुशिववुद्धमन्दिरं स्थापने उद्यता अभवन् । इत्यल्लं पल्लवितेन ।

REFERENCES

१. संस्कृति साहित्येतिहासः, आचार्यः रामचन्द्रः मिश्रः, चौखाष्वा विद्याभवन, वारानसी, २०१३ । २. राजतरङ्गिणीं कोश, डा. रामकुमारः रायः, चौखाम्वा सुरभारती प्रकाशनय, वारानसी, २००२ । ३. विक्रमाङ्कदेवचरितम्, पण्डित हरगोविन्दः शास्त्री, चौखाम्वा सुरभारती प्रकाशनय, नई दिल्ली, १९९८ । ४. संस्कृत साहित्येर इतिहास, युधिष्ठिर गोप, संस्कृत वुक डिपो, कलिकाता, २००७ । ५. संस्कृत साहित्येर इतिहास, ड. देवकुमार दास, श्री वलराम प्रकाशनी, कलिकाता, १४१२ वङ्गाव्द । ६. संस्कृत साहित्येतिहास, आचार्य लोकमणि दाहालः, चौखाम्वा कृष्णदास अकादमी, वारानसी, २०११ । ७. भारतीय इतिहास कोश, सच्चितानन्द भट्टाचार्या, उत्तर प्रदेश हिन्दी संस्थान, लखनऊ, २००४ । ८. राजतरङ्गिणीं, पण्डित रामतेज पाण्डे, चौखाम्वा सुरभारती प्रकाशनय, वारानसी, २००३ । ९. संस्कृत साहित्येर इतिहास, आचार्य हंसराज अग्रवाल, चौखाम्वा सुरभारती प्रकाशनय, वारानसी । १०. वि.ए. संस्कृत निर्देशिका, वनविहारी घोषाल वुकस अयाण्ड टेकनोलजिस , कलकाता, २०१२ । ११. संस्कृत पास (द्बितीय वर्ष) डः अन्नदाशङ्कर पाहाड़ी, माइति पावलिकेशन, मेदिनीपुर, २०१३ । १२. हरविजय काव्य, डा उदयकान्त झा, चौखाम्वा सुरभारती प्रकाशनय, नई दिल्ली, १९९१ ।